Shri Raghunath Temple MSS. Library,
JAMMU

No. १०३२-घ

Title १: गणपतिकवचं "वज्रपञ्जरः"
२: स्कन्दपुराणे शिवकवचम्

Author

Extent १+१=२ Age
१- २

Subject तन्त्र । (पुराणांशः)
(१) २

© Dharmartha Trust. Digitized by eGangotri

गणेशकवचम्
(स्कन्दपुराणे)
शिवकवचम्

१०३२

2 पत्र

© Dharmartha Trust. Digitized by eGangotri

नं. १०३२–ध–१
गणपतिवज्रपंजरः

श्रीगणेशायनमः ॐ श्रीभैरवौवाच महादेवीगणेशस्यवरदस्यमहात्मनः
कवचंतेप्रवक्ष्यामिवज्रपंजरकाभिदं ॐ अस्यश्रीमहागणपतिवज्रपंज
रकवचस्य श्रीनारदऋषिः गायत्रींछंदः श्रीमहागणपतिर्देवता गंबीजं
ह्रींशक्तिः कुरुकीलकं आत्मनोः वाङ्मनःकायोपार्जितपापनिवारणार्थे ॥
श्रीधर्मार्थकाममोक्षार्थेवज्रविद्यासिद्ध्यर्थेमहागणपतिवज्रपंजरकव
चपाठेविनियोगः अथगायत्री तत्पुरुषायविद्महेवक्रतुंडायधीमहि त
न्नोदंतेप्रचोदयात् ३ अथध्यानम् ओंविघ्नेशंविश्ववंद्यंसुविपुलयश
संलोकरक्षाप्रदक्षं साक्षात्सर्वापदासप्रशमनसमतिंपार्वतीप्राणसूनुं।
पायात्सर्वान्सुरेंद्रासुरवरम्निशेसाधकैःपूज्यमानं कारुण्येनांतरा
यामितभयशमनंविघ्नराजंनमामि ॐश्रीह्रींगंशिरः पातुमहागणपति
प्रभ विनायकोललाटंमेविघ्नराजोभ्रुवोमम पातुनेत्रेगणाध्यक्षोनासि
कांमेगजाननः श्रुतीमेवतुहेरंबोगंडौमेमोदकाशनः द्वैमातरोमुखंपातु
चाधरौपातुरंदमः दंतांमेमेकदंतोव्याद् वक्रतुंडोवताउसां नांगेयोमेगलंपा
तुस्कंदोसिंहासनोवतु विघ्नांतकोभुजौपातुहस्तौमूषकवाहनः उरोनना
वतान्नित्यंदेवास्त्रिपुरघातनः हृदयंमेकुमारोव्यात्कृयंतोपार्श्वेउभमकं ॥

© Dharmartha Trust. Digitized by eGangotri

ग० प्रद्युम्नोमेवतात्स्वच्छंनाभिंत्र्यंकरनंदनः कटिंनंदगणःपातुश्रोणींवीरेश्वरोवतु।
१ मेढ्रंमेवतुसौभाग्योभृंगिरीटीचगुह्यकं विराटकोवताद्रूरूजानुमेपुष्पदंतकः
जंघेममविकालोव्याद्गुल्फोवत्यग्रणोवतु पादौचित्तगणःपातुपादाधोलो।
हितोवतु पादपृष्ठंसुंदरोव्यान्नूपुराद्योवपुर्मम विदारोजठरंपातुभूतानिचो
ग्ररूपकः शिरसःपादपर्यंतंवपुःसप्तगणोवतु पादादिमूर्धपर्यंतंवपुःपातु
नुचिंतकः विस्मारितंतुयत्स्थानंगणेशास्तत्सदावतु पूर्वेमांह्रींकरालोव्यादा
ग्नेयेविकरालकः दक्षिणेपातुसंहारोनैरृतेरुरुभैरवः पश्चिमायांमहाका
लोवायौकालाग्निभैरवः उत्तरेमांसिमाव्याद्धै ईशान्यामपितालकः प्रभाते
शतपत्रोव्यात्सहस्रारस्तुमध्यमे दंतमालादिनेव्यान्निशिपात्रंसदावतु क
लशंमांनिशीथेव्यान्निशांतेपरशुस्तथा सर्वत्रसर्वदापातुशंखयुग्मंस
दावतु ओंओंराजकुलेहहोरणभयह्रींह्रींहुघूर्तेवतात् श्रींश्रींशत्रुगृहेशौ
जलभयेक्लींक्लींवनांतेवतु ग्लौंग्लूंग्लेंग्लीसत्वभीतिषुमहाव्याध्यार्तिषु।
ग्लौंगंगौ नित्यंयक्षपिशाचभूतफलिषुग्लौंगंगणेशोवतु इतीदंकवचंपु
ण्यंसर्वतंत्रेषुगोपितं वज्रपंजरनामानंगणेशस्यमहात्मनः अंगभूततंत्र १
मयंसर्वाचारैकसाधनं विधानेननसिद्धिस्यात्सजनस्यजपस्यच तस्मात्

© Dharmartha Trust. Digitized by eGangotri

पूजनंपुण्यंपठेद्वाधारयेत्सदा तस्यसिद्धिमहादेविकरस्थापारलौकिकी यं
यंकामयतेकामंतंतंप्राप्नोतिपाठकः अर्धरात्रेपठेन्नित्यंसर्वाभिष्टफलंल
भेत् इतिगुह्यंसुकवचंमहागणपतेःप्रियं सर्वसिद्धिमयंपुण्यंगोपयेत्पर
मेश्वरी इतिश्रीगणेशकवचंसंपूर्णं ३ ० ॥ॐनमःशिवाय ओंअस्यश्री
शिवककवचस्तोत्रमंत्रस्य श्रीब्रह्माऋषिः गायत्र्यंछंदः श्रीसदाशिवोदेवता
रांबीजं रींशक्तिः रूंकीलकं आत्मनोःवाङ्मनःकायोपार्जितपापनिवारणा
र्थंममरुद्रसाक्षात्कारेशिवकवचपाठेविनियोगः अथगायत्री ॐतत्पुरुषा
यविद्महेमहादेवायधीमहि तन्नोरुद्रप्रचोदयात् अथध्यानं ॐवंदेरुद्र
उमापतिंसुरगुरुंवंदेजगत्कारणंवंदेपन्नगभूषणंशिवधरंवंदेपशूनांप
तिं वंदेसूर्यशशांकवह्निनयनंवंदेमुकुंदप्रियंवंदेशैलसुतामनोहरतरंवंदे
शिवंशंकरं ॐसकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर्
त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल
लोकनिगमगुह्याय सकललोकवरप्रदाय सकलदुःखार्त्तिभंजनाय सक
लजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्वतनि
जावासाय निर्गुणाय निरुपमाय निराभासाय निरामयाय निःष्प्रपंचाय

© Dharmartha Trust. Digitized by eGangotri

त्रि॰ निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निरूपमविभवाय निराधाराय
२ नित्यशुद्धपरिपूर्णसच्चिदानंदाय परमशांतप्रकाशतेजोरूपाय जयजय रुद्र रु
द्र महारौद्र वीरभद्रावतार महाभैरव कल्पांतभैरव कालभैरव कपालमालाध
र खड्ग खट्वांग चर्म पाशांकुश डमरू त्रिशूल चाप बाण गदा शक्तिः भिंडिपाल
तोमर समुद्गर मुद्गर प्रास पाश परिघ पट्टिस भुशुंडी शतघ्नी चक्रायुध भीषण
कर सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फूर्जित ब्रह्मांडमंडल नागेंद्रकुं
डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक
विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्व
तो रक्ष २ ज्वल २ महामृत्युंजय २ अपमृत्युभयं नाशय २ रोगभयमुत्सादय २
विषसर्पभयं शमय २ चोरान्मारय २ मम शत्रूनुच्चाटय २ त्रिशूलेन विदार
य २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथय २ मुशलेन निःशेष
य २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि विद्रावय २ कूष्मांड वेताल ना
रीगण ब्रह्मराक्षसान् संत्रासय २ ममाभयं कुरु २ वित्रस्तमाश्वासय २ नरक
भयान्मामुद्धर २ संजीवय २ क्षुत्तृड्आर्तिं निवारय २ दुःखांतरमानंदय २ शिव २
कवचेन मामाच्छादय २ त्र्यंबक नमस्ते २ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शि
वकवचं संपूर्णम् शुभंभवतु १९ ॥

© Dharmartha Trust. Digitized by eGangotri